# (१३) वेदलक्षणविचारः

अथ को वेद इति चेदुच्यते । अपौरुषेयं वाक्यं वेदः ।
स च
विधिमन्त्रनामधेयनिषेधार्थवादभेदात्पञ्चविधः ।।१३।।

(अपौरुषेयं वाक्यमिति वेद इति लक्ष्यनिर्देशः। तत्र भारतादौ अतिव्याप्तिवारणाय अपौरुषेयमिति विशेषणम्। आत्मादौ तद्दोषवारणाय वाक्यमिति विशेष्यम्। )

# (१४) विधिमीमांसा

तत्र अज्ञातार्थज्ञापको वेदभागो विधिः। स च तादृशप्रयोजनवदर्थविधानेनार्थवान् यादृशं चार्थं प्रमाणान्तरेणाप्राप्तं विधत्ते। यथा – अग्निहोत्रं जुहुयात्स्वर्गकाम इति विधिर्मानान्तरेणाप्राप्तं स्वर्गप्रयोजनवद्धोमं विधत्ते। अग्निहोत्रहोमेन स्वर्गं भावयेदिति वाक्यार्थबोधः।।१४।।

# (१५) गुणविधिः

यत्र कर्म मानान्तरेण प्राप्तं तत्र तदुद्देशेन गुणमात्रं विधत्ते ।

यथा – दध्ना जुहोति इत्यत्र होमस्याग्निहोत्रं जुहुयादित्यनेन प्राप्तत्वाद्धोमोद्देशेन दधिमात्रविधानं दध्ना होमं भावयेदिति ॥१५॥

# (१६) विशिष्टविधिः

यत्र तूभयमप्राप्तं तत्र विशिष्टं विधत्ते । यथा – सोमेन यजेत इत्यत्र सोमयागयोरप्राप्तत्वात्सोमविशिष्टयागविधानम् । सोमपदे मत्वर्थलक्षणया सोमवता यागेनेष्टम्भावयेदिति वाक्यार्थबोधः ॥१६॥

# (१७) वाक्यभेददोषपरिहारः

न च उभयविधाने वाक्यभेदः। प्रत्येकमुभयस्याविधानात्।
किन्तु विशिष्टस्यैकस्यैव विधानात् ॥१७॥

# (१८) गुणविध्यादिभेदः

नच 'ज्योतिष्टोमेन स्वर्गकामो यजेते'ति विधिना प्राप्तयागोद्देशेन सोमरूपगुणविधानमेवास्तु, सोमेन यागं भावयेदिति ।
किम्मत्वर्थलक्षणयेति वाच्यम् ।
तस्याधिकारविधित्वेनोत्पत्तिविधित्वासम्भवात् ।।१८।।

# (१९) उभयविधित्वम्

न'नूद्भिदा यजेत पशुकाम' इत्यस्येव ज्योतिष्टोमेनेत्यस्याप्युत्पत्यधिकारविधित्वमस्त्विति चेन्न। दृष्टान्ते उत्पतिवाक्यान्तराभावेनाऽन्यथानुपपत्या तथात्वाश्रयणात्। किञ्च ज्योतिष्टोमेनेत्यस्योभयविधित्वेऽनेनैव यागस्तस्य फलसम्बन्धोऽपि बोधनीय इति सुदृढो वाक्यभेदस्तद्वरं सोमपदे मत्वर्थलक्षणया विशिष्टविधानम्॥ १९॥

# (२०) विधिश्चतुर्विधः

विधिश्चतुर्विधः।
उत्पत्तिविधिर्विनियोगविधिरधिकारविधिः
प्रयोगविधिश्चेति॥२०॥

# (२१) उत्पत्तिविधिः

तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः । यथाऽग्निहोत्रं जुहोतीति । अत्र च विधौ कर्मणः करणत्वेनान्वयः । अग्निहोत्रहोमेनेष्टं भावयेदिति ॥ २१ ॥

# (२२) यागस्यरूपद्वयम्

ननु यागस्य द्वे रूपे । द्रव्यं देवता च । तथा च रूपाश्रवणे ‘अग्निहोत्रं जुहोती’ति कथमुत्पत्तिविधिः । अग्निहोत्रशब्दस्य तु तत्प्रख्यन्यायेन नामधेयत्वादिति चेन्न । रूपाश्रवणेऽप्यस्योत्पत्तिविधित्वात् । अन्यथा रूपश्रवणाद्दध्नाजुहोतीत्ययमेवोत्पत्तिविधिः स्यात् । तथा चाग्निहोत्रं जुहोतीति वाक्यमनर्थकं स्यात् ॥ २२ ॥